International Journal of Sanskrit Research 2021; 7(5): 100-101

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 100-101
© 2021 IJSR
www.anantaajournal.com
Received: 08-07-2021
Accepted: 27-08-2021

**दीपक कालिया**
ज़ाकिर हुसैन दिल्ली कॉलेज (प्रातः)
दिल्ली विश्वविद्यालय, दिल्ली, भारत

**Corresponding Author:**
**दीपक कालिया**
ज़ाकिर हुसैन दिल्ली कॉलेज (प्रातः)
दिल्ली विश्वविद्यालय, दिल्ली, भारत

# संस्कृतसंस्कृतिरक्षणे विदुशी डॉ. रमाचौधुरी महाभागायाः योगदानम्

## दीपक कालिया

**प्रस्तावना**

भारतस्यगौरवमिद् यत् शिक्षाजगति विदूशां समकक्षे विदूशीनामपि यशः सर्वत्र विद्यते। भारतवर्शस्य नार्यः प्रायः सर्वेशु क्षेत्रेशु अग्रगण्याः तासाम् च योगदानम् श्लाघनीयम्। अर्वाचीनकालस्य संस्कृतविदुशी डॉ. रमाचौधुरी महाभागा सुप्रसिद्धा लेखिका। डॉ. रमाचौधुरीमहाभागायाः शिक्षा कलकत्ताविश्वविद्यालयतः अभवत्। सा ऑक्सफोर्डविश्वविद्यालयतः च दर्शनविशये डि. फिल उपाधिं प्राप्तवती। त्रिंशत्वर्शाणि लेडी–ब्रवोर्नमहाविद्यालये प्रधानाचार्यायाः एवं सप्तवर्षाणि रवीन्द्रभारतीविश्वविद्यालयस्य कुलपतिपदमलङ्कृतवती। सुप्रसिद्ध–संस्कृतविद्वान् डॉ. यतीन्द्रविमलचौधुरी महोदयेन सह 1938 तमे वर्शे परिणयसूत्रे निबद्धा। डॉ. यतीन्द्रमहोदयस्य प्रत्येककार्ये निरन्तर एशा सहभागिनी रूपेण आसीत्। तस्य प्राच्यवाणी नाम्नः संस्थायाः कार्येशु एशा संलग्ना। संस्थायाः प्रमुखकार्यं संस्कृतभाशायाः प्रचारम् आसीत्। प्राच्यवाणीसंस्थामाध्यमेन भारतस्य विविधप्रदेशेशु विदेशेश्वपि नाट्य अभिनयेन संस्कृतभाशायाः भारतीयसंस्कृतेः च प्रचारं प्रसार कृतम्। भारतीयसांस्कृतिक प्रवृत्तिवर्धनाय नाटकाना मञ्चनं एव तस्याः मुख्यं उद्देश्यमासीत्। 1970 तमे वर्शे सा जर्मनसर्वकारेण उच्चभारतीयनागरिकसम्मानेन सम्मानिता। महोदयया संस्कृतबांग्लाआंग्लभाशामधिकृत्य लेखन–कार्यं कृतम्। सा पतिदिवंगते सति चतुर्वर्शेशु एव विंशतिनाटकानि रचितवती। तस्याः नाटकानि तु संस्कृतभाशायामेव परं दर्शनविशयक ग्रन्थाः आंग्ल एवं बांग्लाभाशामधिकृत्य रचिताः। महोदयायाः नाटकानि सांस्कृतिक–सामाजिक–दार्शनिक दृश्ट्यामहत्वपूर्णानि यथा पल्लीकमलम्, मेघमेदुरमेदनीयम्, रामचरितमानसम् एतेशु भारतीयसंस्कृतेः चित्रणमस्ति। देशदीपम्, कविकुलकोकिलम्, निवेदितनिवेदितम्, भारततातम्, भारतपथिकम् एतानि नाटकानि सामाजिकदृष्ट्या महत्वपूर्णानि। दार्शनिकदृश्ट्या शंकर–शंकर अभेदानन्दं च वेदान्तदर्शनविशयक–नाटकद्वयम् महत्वपूर्णम्। महाभागायाः योगदानस्य विवेचनम् त्रिविधदृश्ट्या कृतम्। महाभागया रचितेशु नाटकेशु विशयवस्तु प्रायः महापुरूशाणां जीवनगाथा एव। यथा युगजीवने नाटके स्वामी रामकृश्णस्य जीवनचरितमस्ति। "निवेदित–निवेदितम्" इत्यस्मिन् नाटके भागिनीनिवेदितायाः चरितगाथा वर्णिता भगिनी निवेदितया कृतानि कार्याणि यथा दरिद्रनाराय सेवा, उपक्षितानां नारीणामोत्थानं च अतीव प्रेरणप्रदति। चैतन्यचैतन्यम् नाटके महाप्रभुचैतन्यस्य चारुचरितावली चित्रिता।

भारतपथिकनाम्नः नाटकस्य पंचदृश्येशु राजाराममोहनरायस्य जीवनगाथा विद्यते। कविकुलकमलनाटकम् कालिदासस्य उत्तरकालीनचरितं वर्णयति। भारताचार्यस्य नाटकस्य द्वादशदृश्येशु भारतस्य राष्ट्रपति सर्वपल्ली राधाकृशणन्–महोदयस्य पावनचरितं वर्णितम्। "अग्निवीणा नाटकम्" बांग्लादेशस्य महाकविनजरूलइस्लामस्य चरितगाथाम् अधिकृत्य रचितम्। अपि च बंगप्रदेशस्य महान् उपन्यासकार ताराशंकरबन्धोपाध्यायस्य जीवनचरिताघारितम् गणदेवतानाम्नः नाम्नः नाटकमस्ति। "यतीन्द्रम्" इति नाटकेस्मिन् महोदयायाः पत्युः यतीन्द्रस्य चारुचरितावली वर्तते। 1964 तमे वर्शे यतीन्द्रमहोदयः दिवंगतः। तस्मिन् एव वर्शे नाटकमिदं रचितम् शङकेशु निबद्धं "भारततातम्" नाटकं महात्मागान्धिनः जीवनचरित्रं प्रस्तौति। "प्रसन्नप्रसादं" नाटकमिदं बंगदेशीय सुप्रसिद्धः गायकः श्रीरामप्रसादस्य जीवनचरित्रं वर्णयति। "भारतवीरम्" इत्यस्मिन् नाटके शिवाजीवीरस्य चरित्रं प्रस्तुत कृतम्। "तानतनु" नाटके तानसेनस्य संगीतमयजीवनस्य दृश्यं दृश्यते। एवं महापुरुशाणां जीवनचरितचित्रणेन राजनीतिक–सामाजिक–सांस्कृतिक अध्यात्मिक विशयक प्रेरणादायिनी शिक्षा लभते।

"शंकर–शंकर" नाटकमिदं दार्शनिकदृश्ट्या अतीव महत्वपूर्णम्। नाटकेस्मिन् चतुर्दशदृश्याः सन्ति। अस्मिन् जगद्गुरुशंकराचार्यस्य जीवनचरित्रं वर्णितम्। आचार्य गोविन्दपादेन शंकराचार्यः एवं उपदिश्टः–
"दिग्विजयं कुरु, प्रचारय महिममयं ब्रह्मतत्वम्" सर्वमेव ब्रह्म।
अद्वैतवेदान्तस्य सरल–सरस रूपेण चित्रणं कृत्वा शंकराचार्यमाध्यमेन इदं साररूपेण प्रतिपादितम् यत्–

नादिर्ममान्तो न च देशकालौ न नामरूपे विदिते ममास्तः।
द्वितीयहीनं पुनररस्मि तत्वं सत्तास्मि सत्यं च तथा द्वितीयम्।।

**"अभेदानन्दः"** इति नाम्नः नाटकस्य द्वादशदृश्येशु रामकृश्णस्य प्रमुखशिश्यः स्वामीअभेदानन्दस्य सम्पूर्ण जीवनस्य चरितगाथा वर्तते। अभेदानन्दः रामकृश्णवेदान्तमठं स्थापितवान्। तस्य दार्शनिक चिन्तनमत्र दरीदृश्यते।
राश्ट्रियभावनां दर्शयति अस्याः "देशदीपम्" नाम्नः नाटकम्। अस्य नवदृश्येशु देशस्य वीरसौनिकानां शैर्यगाथा वर्णिता। अस्मिन् नाटके ग्रामः मुख्यकार्यस्थली। कृशकपरिवारस्य पुत्रः चम्पकवदनः। देशरक्षायै दृढ़संकल्पं कृत्वा युद्धे शत्रून् पराजित्य स्वप्राणान् दत्त्वा अमरः जातः। नवमदृश्ये चम्पकवदनवीरस्य जन्मदिवसस्य वर्णनम् विद्यते। सः ग्रामस्य स्मृतिं कृत्वा अस्मिन् दिवसे किंचित् कर्तुं इच्छति। सः मातृभूम्यै युद्धे भारतीयपताकां स्थापितवान् "वन्देमातरम्" इति उच्चस्वरेण अगायत्। युद्धे चम्पकवदनः शस्त्रेण आहतः चिकित्सालयं च गत्वा सः तदा अकथयत्–
"अस्तं गच्छति मम जीवनसूर्योऽपि। परन्तु कदापि नास्तं गमिश्यति भारतमातुर्महागौरवच्छविः"। तस्मिन्नेव काले तस्य भगिनी पंकजनयना मित्रं अभ्रप्रतिम च आगतवन्तौ। पंकजनयना तमकथयत्–

"न पार्थिवो जात्वसि चम्पकस्त्वं त्वं पारिजातः सुरलोक प्रजातः।
छेशस्य चेतः सरसि प्ररूढ–प्योजवतिष्ठ चिरप्रकाशः।।

चम्पकः भगिनीं कथयति यत् मातरं कथय यत् अद्य तव देशदीपः सार्थकः सज्जातः। मातुः देशरक्षायै पुत्रत्यागः श्लाघनीयः। चम्पकवदनस्य माता पुत्रं कथयति–।
सर्वोपरिश्ठाद् भव देशदीप आलोकधारां वितरात्र देशे।
मार्गच्युतो द्रक्ष्यति येनं मार्गं जनिश्यते येन च विश्वमिद्धम।
देशरक्षणे दिवंगते सति माता कथयति– पुत्रः देशदीपो जातः। इदृशी राश्ट्रियभावना नाटकेअस्मिन वर्तते। अद्यतनीय युगे अस्याः भावनायाः महतो आवश्यकता प्रतीयते।
पारिवारिकमनोदशा, पितापुत्रीस्नेहं, सामाजिक आचार व्यवहारं दर्शयति "पल्लीकमलम्" नाटकम्। नाटकेऽस्मिन् नवदृश्याः सन्ति। सामाजिकदृश्ट्या नाटकमिदं विषिश्टम् पुत्रीपित्रयोः परस्परमनोभावानाम् अभिव्यक्तिः समाजस्य यथार्थ चित्रणं करोति। यथा– कमलकलिका पुत्री यदा अजानत यत् तस्याः विवाहः अन्यपुरुशेण सह पित्रा सुनिश्चितं कृतम् तदा सा मनसि चिन्तयन्ती कथयति "को मां रक्षति व्याघ्रकवलात्।" पिता तदैव "सुतायाः "मनसि किं वर्तते" इति ज्ञात्वा वरपक्षमवदत् यत् किंचित् कालान्तरं प्रतीक्षस्व यतोहि अस्मिन् विशये सर्वप्रथमे सुतायाः सम्मतिः आवश्यकी तदनन्तरमेव वार्ता भविश्यति। विवाहविशये सुतायाः सहमति अत्यावश्यकं इति दर्शितम्।
एवं डॉ. रमाचौधुरीमहोदया आभिः रचनाभिः माध्यमेन संस्कृत संस्कृतिरक्षणे दार्शनिक–सामाजिक सांस्कृतिक दृश्ट्या महद्योगदानं दत्तवती। न केवलं लेखनमाध्यमेन अपितु मञ्चनेनापि। प्रायः सवेशां नाटकानां मञ्चनं प्राच्यवाणीसंस्था द्वारा कृतम्। मञ्चनेन तु सरलरूपेण सर्वाधिक जनाः एतै; नाटकैः लाभान्विताः सज्जाताः। वस्तुतः नाटकविधा अन्य काव्यविधासु श्रेश्ठतरा। कथितम् हि– "काव्येशु नाटकं रम्यम्" यतः रोचकपूर्णशैल्यां सरल सरस भाशया संदेशप्रदानम् अपेक्षाकृतं सुकरम्। डॉ. सतकरीमुखर्जी महोदयेन रामचौधुरी महाभागायाः शंकर–शंकर नाटकविशये कथितम्–
"Who could have though her capable of producing such a superb dramatic work on Sankara's holy life and teaching, in such a beautiful poetic enchanting easily intelligible language"
रमाचौधुरी महोदयायाः नाटकेशु संगीतबाहुल्यम् वर्तते एकोक्तिप्रयोगोऽपि नाटकेशु दृश्यते।
यथा–

सुनीलगगने शीतलपवने चलति ज्योत्स्नातरणी।
उर्मिमूलिका मेघमालिका नृत्यति मानस भरणी।

एवञ्च कविकुल कोकिल नाटकस्य तृतीये दृश्ये कालिदासस्य एकाकक्तिप्रयोगेन वृक्षैः सह वार्ता दर्शनीया–
भो भो वनस्पतयः प्रणमामि भवतः। श्यामल–कोमल–पत्रदल–सज्जित शाखा–प्रशाखा–रम्या हि भवन्तः– उन्नतमस्तका विस्तृत वक्षसः प्रसारितकराः सुदृढ़पादाश्च। तथापि क्षुद्रातिक्षुद्रोऽहं भवतां श्रीशरीरेशु कुठाराघातं कृत्वा ममाधन्यं जीवनं धारयितुमिच्छामि। अहो लज्जा मम। ततः कृपया क्षमन्तां मामधमजनम्। सन्तानो हि भवत्पदनतः। आशिशं ददतु, तस्मै कृपया। एवं लेखिकायाः एकोक्तयः भावुकतापूर्णाः।
प्रायः संस्कृतनाटकेशु ग्राम्य जीवन चित्रणं अधिकं न कृतम् परं अत्र लेखिका ग्रामवासीनां भावधारां एवं वर्णयति–

श्रेश्ठव्रतं तत् खलु जीवनस्य स्वदेवमातुर्नियतार्चनं यत्।
आलोकरेखा फलमम्बु वायुर्यस्याः सदारक्षति जीवनं नः।।
धन्यं भवेदर्जनमर्पणेन दानेन धन्यं ग्रहणं हि लोके।
यदर्जितं जीवनमद्य मातुर्देयं तदस्यै बहुमान पूर्वम्।।

एवं संस्कृत विदुशी डॉ. रमाचौधुरी महाभागायाः संस्कृत–संस्कृति रक्षणे योगदानं अन्यतमं सुग्राह्यम् च वर्तते। अनेन लेखिका कृते इयं प्रशस्तिः चरितार्था भवति–
The only lady dramatist, poet ballet writer and drama organizer etc. of India and outside of great fame and universal approbation, Pioneer of Modern Sanskrit Drama Movement in India

## संदर्भ ग्रन्थ

1. उपाध्याय, राम जी– आधुनिक संस्कृत नाटक, चौखम्बा विद्याभवन, वाराणसी, द्वितीय संस्करण 1996